श्रुत्वाधर्मंविजानातिश्रुत्वात्यजतिदुर्मतिं ॥ श्रुत्वाज्ञानमवाप्नोतिश्रुत्वामोक्षंचगच्छति ॥२०१॥ तस्मादिदं
सदासेव्यंश्रोतव्यंचसदैवहि ॥ कुतर्कदावदग्धेभ्योनदातव्यंकथंचन ॥२०२॥ संसारविषपानेनयेमृताःप्रा
णिनोभुवि ॥ अमृतायस्मृतस्तेषांकृष्णामृतमहार्णवः ॥२०३॥ क्विन्नंपादोदकेनैवयस्यनित्यंकलेवरं ॥ ती
र्थकोटिसहस्रैस्तुस्नातोभवतिप्रत्यहं ॥२०४॥ तीर्थकोटिसहस्रैस्तुसेवितैःकिंप्रयोजनं ॥ तोयंयदिपिबेन्नित्यं
शालग्रामशिलाच्युतं ॥२०५॥ शालग्रामशिलास्पर्शंयेकुर्वंतिदिनेदिने ॥ वांछंतिकरसंस्पर्शंतेषांदेवाःसवा
सवाः॥२०६॥ दुःसहोनारकोवह्निर्दुःसहायमकिंकराः॥ विषमश्रांतकपथःप्रेतत्वंचातिदारुणं ॥२०७॥ संचिं
त्यमनसाप्येवंपातकाद्विनिवर्तयेत् ॥ स्मरणंकीर्तनंविष्णोःसदैवनपरित्यजेत् ॥२०८॥ अच्युतानंतगोविंद
नामोच्चारणभेषजात् ॥ नश्यंतिसकलारोगाःसत्यंसत्यंवदाम्यहं॥२०९॥ सकृदुच्चरितंयेनहरिरित्यक्षरद्वयं॥
बद्धःपरिकरस्तेनमोक्षायगमनंप्रति ॥२१०॥ एवंब्रह्मादयोदेवाऋषयश्चतपोधनाः॥ कीर्तयंतिपरंश्रेष्ठंदेवंना
रायणंप्रभुं ॥२११॥ किंतस्यदानैःकिंतीर्थैःकिंतपोभिःकिमध्वरैः ॥ योनित्यंध्यायतेदेवंनारायणमनन्यधीः
॥२१२॥ नित्योत्सवोभवेत्तेषांनित्यश्रीर्नित्यमंगलं ॥ येषांहृदिस्थोभगवान्मंगलायतनंहरिः॥२१३॥ जीवंश्च

कृष्णा० ॥ ९ ॥

तुर्दशाद्दूर्ध्वंपुरुषोनियमेनतु ॥२१४॥ दशावराणांदेहानांकारणानिकरोत्ययं ॥ स्त्रीवाप्यनूनदशकंदेहंमानु
षमार्जयेत् ॥२१५॥ चतुर्दशोर्ध्वजीवीनिसंसारश्चादिवर्जितः ॥ अतोविश्वापरंदेवंमोक्षाशाकामहामुने
॥२१६॥ आचतुर्दशमाद्वर्षात्पुरुषोनियमेनतु ॥ दशावराणांदेहानांकारणानिकरोत्ययं ॥२१७॥ अतःक
र्मक्षयान्मुक्तिःकुतएवभविष्यति ॥ समानांविषमापूजाविषमाणांसमातथा ॥२१८॥ क्रियतेयेनदेवोपिस्व
पदाद्भ्रश्यतेहिसः॥ वित्तंबंधुर्वयःकर्मविद्याचैवतुपंचमी ॥ एतानिमान्यस्थानानिगरीयोह्युत्तरोत्तरं॥२१९॥
गुणानुसारिणींपूजांसमांदृष्टिंचयोनरः ॥ सर्वभूतेषुकुरुतेतस्यविष्णुःप्रसीदति ॥२२०॥ यथासुहृत्सुकर्तव्यं
पितृभ्रातृसुतेषुच ॥ तथाकरोतिपूजांहिसमबुद्धिःसउच्यते ॥ २२१ ॥ तिर्यक्पुंड्रंनकुर्वीतसंप्राप्तेमरणेपिवा
॥२२२॥ नचान्यनामविब्रूयात्परान्नारायणादृते ॥ नैवेद्यशेषंदेवस्ययोभुनक्तिदिनेदिने ॥२२३॥ सिक्थेसि
क्थेभवेत्पुण्यंचांद्रायणशताधिकं ॥ ऊर्ध्वपुंड्रमृजुंसौम्यंललाटेयस्यदृश्यते ॥२२४॥ सचंडालोपिशुद्धात्मा
पूज्यएवनसंशयः ॥२२५॥ अशुचिर्वाप्यनाचारोमनसापापमाचरन् ॥२२६॥ शुचिरेवभवेन्नित्यमूर्ध्वपुंड्रां ॥७६६॥
कितोनरः ॥ ऊर्ध्वपुंड्रविहीनस्यस्मशानसदृशंमुखं ॥२२७॥ अवलोक्यमुखंतस्यआदित्यमवलोकयेत् ॥

महा०

यज्ञोदानंतपश्चैवस्वाध्यायःपितृतर्पणं ॥२२८॥ व्यर्थंभवतितत्सर्वमूर्ध्वपुंड्रंविनाकृतं ॥ गोपीचंदनलिप्तांगो
यंयंपश्यतिचक्षुषा ॥२२९॥ तंतंशुद्धंविजानीयान्नात्रकार्याविचारणा ॥ आस्फोटयंतिपितरःप्रनृत्यंतिपि
तामहाः॥२३०॥वैष्णवोस्मत्कुलेजातःसनःसंतारयिष्यति ॥जीवितंविष्णुभक्तस्यवरंपंचदिनान्यपि॥२३१॥
नतुकल्पसहस्रैस्तुभक्तिहीनस्यकेशवे ॥ किंतेनजातमात्रेणभूभारेणान्नशत्रुणा ॥२३२॥ योजातोनार्चयेद्वि
ष्णुंनस्मरेन्नापिकीर्तयेत् ॥ योददातिद्विजातिभ्यश्चंदनंगोपिमर्दितं ॥२३३॥ अपिसर्षपमात्रेणपुनात्यासप्त
मंकुलं ॥ ज्ञानीचकर्माणिसदोदितानिकुर्यादकामःसततंभवेत ॥२३४॥ अतीतानागताज्ञानीत्रैलोक्युद्धर
णक्षमः ॥ एतादृशोपिनाचारंश्रौतंस्मार्तंपरित्यजेत् ॥२३५॥ यदेवविद्ययाकरोतिश्रद्धयोपनिषदातदेववी
र्यवत्तरंभवति ॥ कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाः ॥२३६॥ एवंत्वयिनान्यथेतोस्तिनकर्मलिप्यतेनरे॥
आचारश्चैवसाधूनामात्मनस्तुष्टिरेवच ॥२३७॥ वेदप्रणिहितोधर्मोह्यधर्मस्तद्विपर्ययः ॥ निष्कामंज्ञानपूर्वंतु
निवृत्तमिहचोच्यते ॥२३८॥ निवृत्तंसेवमानस्तुब्रह्माभ्येतिसनातनं ॥२३९॥ श्रीमदानंदतीर्थार्यसहस्रकि
रणोत्थिता ॥ गोततिःसततंसेव्यागीर्वाणैःसिद्धिदाभवेत् ॥ २४० ॥ यस्यत्रीण्युदितानिवेदवचनेरूपाणि

१२९

कृष्णा० दिव्यान्यलंबद्दतद्दर्शतमित्थमेवनिहितंदेवस्यभर्गोमहत् ॥ वायोरामवचोनयंप्रथमकंपृक्षोद्वितीयंवपुर्मध्वो महा०
॥ १० ॥ यत्तुतृतीयमेतदमुनाग्रंथःकृतःकेशवे ॥ २४१ ॥ यःसर्वगुणसंपूर्णःसर्वदोषविवर्जितः ॥ प्रीयतांप्रीतएवालं
विष्णुर्मेपरमःसुहृत् ॥२४२॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितःकृष्णामृतमहार्णवःसंपूर्णः ॥

॥ कृष्णामृतमहार्णवःसंपूर्णः ॥

॥७६७॥